## तावतिथं ग्रहणमिति लुग् वा । (७७/१८७७)

तावतां पूरणं तावतिथम् । गृह्यतेऽनेन इति ग्रहणम् । प्रकृतिविशेषणं चैतत् । [1]पूरणप्रत्ययान्तात् प्रातिपदिकात् ग्रहणोपाधिकात् स्वार्थे कन् प्रत्ययो भवति । [2]पूरणस्य प्रत्ययस्य वा [3]लुक् । द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम्, द्वितीयकम् । त्रिकम्, तृतीयकम् । चतुष्कम्, चतुर्थकम् ।

[५७२] तावतिथेन गृह्णातीति कन् वक्तव्यः, पूरणप्रत्ययस्य च नित्यं लुक् । (म.भा. २.३८८)

षष्ठेन रूपेण [4]ग्रन्थं गृह्णाति षट्को देवदत्तः । पञ्चकः । चतुष्कः[5] । इतिकरणो विवक्षार्थः । तेन ग्रन्थविषयमेव ग्रहणम् विज्ञायते, नान्यविषयम् ॥

## स एषां ग्रामणीः । (७८/१८७८)

स इति प्रथमासमर्थात्[6] एषामिति षष्ठ्यर्थे कन् प्रत्ययो भवति, यत् [7]तत् प्रथमासमर्थं ग्रामणीश्चेत् [8]स भवति । ग्रामणीः[9] प्रधानः, मुख्यः [10]इत्यर्थः । देवदत्तः ग्रामणीः एषाम् देवदत्तकाः । [11]ब्रह्मदत्तकाः । ग्रामणीः इति किम् ? देवदत्तः शत्रुरेषाम् ॥

## शृङ्खलमस्य बन्धनं करभे । (७९/१८७९)

शृङ्खलशब्दात् प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे कन् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं बन्धनं चेद् तद् भवति, यत् तद् अस्य इति निर्दिष्टं करभश्चेत् स भवति । शृङ्खलं बन्धनमस्य करभस्य शृङ्खलकः[12] । उष्ट्राणां बालकाः करभाः । तेषां[13] काष्ठमयं [14]पाशकं पादे व्यतिषज्यते,[15]तदुच्यते शृङ्खलमिति । यद्यपि रज्ज्वादिकमपि तत्रास्ति तथापि शृङ्खलमस्यास्वतन्त्रीकरणे भवति साधनमिति [16]बन्धनमित्युच्यते ॥

## उत्क उन्मनाः । (८०/१८८०)

उत्कः इति निपात्यते, उन्मनाश्चेद् स भवति । उद्गतं मनो यस्य स उन्मनाः । उच्छब्दात् [17]ससाधन-क्रियावचनात् तद्वति कन् प्रत्ययो [18]निपात्यते । उत्को देवदत्तः । उत्कः प्रवासी । उत्सुकः[19] इत्यर्थः ॥

## कालप्रयोजनाद्रोगे । (८१/१८८१)

[20]अर्थलभ्या समर्थविभक्तिः । कालात् प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्तात् रोगेऽभिधेये कन् प्रत्ययो भवति । कालो दिवसादिः । प्रयोजनं कारणं रोगस्य फलं[21] वा । द्वितीयेऽह्नि भवो द्वितीयको ज्वरः[22] । चतुर्थकः[23] । प्रयोजनात् – विषपुष्पैर्जनितो विषपुष्पको ज्वरः । काशपुष्पकः । उष्णं कार्यमस्य उष्णको ज्वरः । [24]शीतको ज्वरः । उत्तरसूत्रात् इह सञ्ज्ञाग्रहणम् [25]अपकृष्यते । तेनायं प्रकारनियमः सर्वो लभ्यते[26] ॥

---

1. पूरणान्तात् ग, पूरणग्रहणोपाधिकान्तात् ह. 2. पूरणप्रत्ययस्य ब.क.ड.फ.ह. 3. लुक् नास्ति क.फ.ह. 4. ग्रन्थम् नास्ति क. 5. नवकः इत्यधिकम् ड. 6. प्रातिपदिकात् इत्यधिकम् क. 7. तत् नास्ति क. 8. स नास्ति ह. 9. इति इत्यधिकम् फ, प्रधानं ड. 10. उच्यते फ. 11. यज्ञदत्तकाः ग. 12. करभः इत्यधिकम् ब.क.ड.ह. 13. यत् इत्यधिकम् ड.फ. 14. पाशरूपं ब.फ, पाशं ह. 15. यत् इत्यधिकम् ड. 16. बन्ध-मुच्यते क. 17. संसाधन° ड. 18. विज्ञायते फ, भवति ग. 19. उत्कण्ठित इत्यधिकम् ग. 20. अर्थाभ्यां ग. 21. च प्रयोजनम् इति जयादित्यः इत्यधिकम्, वा नास्ति क. 22. तृतीयकः इत्यधिकम् ब.क.ड.फ. 23. पञ्चकः इत्यधिकम् ह. 24. शीतं कार्यमस्य इत्यधिकम् ग. 25. अनुकृष्यते फ, अनुवर्तिष्यति ग. 26. रोगे इति किम् ? द्वितीयो दिवसोऽस्य द्वितीयकः इत्यधिकम् ड.